15. da paṁca-mahāpātakar-appar [।*]
स्वदत्तं(त्तां) परदत्तं(त्तां) वा

१६. यो हरेति(त) वसुन्द(न्ध)रा[म् ।*] षष्टिर्वरिषा[1] सहश्रा(स्रा)णि वि-

१७. ष्टायां जायते क्रि-

१८. मिः ॥

SUMMARY

When the Śaka year Nine hundred and twenty one and the cyclic year Vikāri were current,

when the *Dharma-mahārājādhirājā*, the lord of **Kovaḷālapura**, the master of **Nandagiri**, the servant of victory, the prince-handsome, the illustrious **Nīti-marga Koṅguṇivarma Permānaḍigaḷ** was ruling over the earth,

the illustrious **Pṛithuvabbarasi**, the beloved of the illustrious **Gōbindara-dēva**, who was born in the **Noḷṁba** family, who was the tiara of the **Pallava** dynasty, who was verily the Rōhiṇī, the Rukminī of the Kali age, devoted to her husband, respected by the world of righteous thinking, truthful, and the eldest daughter of **Tribhuvana-Vīra-Noḷaṁba** and the **Permmānaḍi** jointly made the grant of.........., free of all hindrances, of the **'Twelve'** *(mahājanas)* of **Elavakkalūru.**

Whoever flouts this grant would have incurred the five great sins of destroying the **'Twelve'** *(mahājanas)*, and of destroying cows and *brāhmaṇas* at Vārāṇasī.

The text concludes with one of the usual imprecatory verses in Sanskrit.

---

[1] Read °वष°.

No. 154

BEḶACHALAVĀḌI INSCRIPTION OF NĪTIMĀRGA-PERMĀḌI, ŚAKA 935

Provenance : Beḷachalavāḍi, Gundlupet Taluk, Mysore District, Karnataka.

Reference : *Mys. Arch. Rep.*, 1935, B.R. Gopal, *et. al.* : *E.C.*, Vol. III (Revised edn., 1974), Gu. 48.

Language : Kannaḍa.

Script : Kannaḍa.

Date : Śaka 935, Regnal year 37, Uttarāyaṇa-saṁkrānti, Sunday=1013 A.D., December 24, Thursday (and not Sunday).

TEXT[1]

1. Svasti [।*] **Sa(Śa)kha(ka)-nri(nṛi)-**
2. **pa-kāl-ātīta-**
3. **sa[ṁ*]vatsara-sa(śa)taṁ-**
4. **ga[ḷ*] 935 neya** sūryapa-
5. dagandara[2] **Nītimārgga-Permāḍi**
6. **paṭṭaṁ-gaṭṭida 37 neya variṣa**[3]
7. śrīmad-ayyana-cakraṁ śrī-**Pe-**
8. **rmmāḍi-gāvuṇḍa** nāḷ-gāvuṇḍu
9. geyyuttumire Per̤āyada[1]

---

[1] After the text in *E.C.*, Vol. III (Revised edn., 1974).

[2] The intended reading seems to be *Sury-ōparāgadandu-śrī-*

[3] Read *varṣa*.

[4] On the one hand Per̤āya may be taken to be the name of a village. On the other, it could be understood in the sense of a revenue department (*per̤-āya*). The latter interpretation is supported by the passage in lines 11-13; *Per̤āyada Kur̤uvatti Bēḍa-gāvuṇḍanuṁ* in which, since Bēḍagāvuṇḍa obviously hailed from Kur̤uvatti, *Per̤āya* should denote something other than a place. Gopal *et. al.* have taken *Kur̤uvatti* to mean 'shepherd'. If at all, it could only mean 'shepherdess', which does not suit the context. It is, therefore, advisable to take Kur̤uvatti for a place-name. *Per̤-āya* in all probability is a term relating to realised income or levy from *per̤* 'to get' and *āya*=income.

10. Jēḍuvara Eṟeyaṁga-
11. gāvuṇḍanum Peṟāyada
12. Kuṟuvatti Bēḍa-gāvu-
13. ṇḍanuṁ Āyvamar-oḍe-
14. yara magaṁ Si(Śi)vamār-oḍeyara magaṁ Mēlār-o-
15. deya Mārayyaṁge dānasu-goṭṭar-utta-
16. rāyaṇada saṁkrānti Aditya-
17. vāram-āge Nāraṇāgā-
18. la biṭ[ṭ*]aṁ nelanu Candra-
19. num-uḷḷanaka [॥*]

SUMMARY

In the Śaka year 935, on account of Solar eclipse,[1] in the 37th year after the coronation of Nītimārga-Permāḍi, while the illustrious Permāḍi-gāvuṇḍa, the very wheel of his illustrious master, was holding the office of *nāḷgāmuṇḍu*, Eṟeyamga-gāvuṇḍa (the son or servant) of Jēḍuva of Peṟāya and Bēḍa-gāvuṇda of Kuṟuvatti, also of Peṟāya, granted the village Nāraṇāgala to Mēlār-oḍeya Mārayya, the son of Śivamāra-oḍeya, the son of Āyvamar-oḍeya, on Sunday, Uttarāyaṇa-saṅkrānti. The gift is to last till such time as the moon itself lasts.

---

[1] In Kannaḍa inscriptions, in the date portions, when either a solar or a lunar eclipse is mentioned, it is often found that while the other details of date agree, the eclipse itself would have occurred a few days earlier or later. This does not render the date given irregular. On the other hand, it only means that the eclipse is mentioned because the grant recorded in the inscription would have been made on account of that meritorious occasion (*uparāgapuṇya-kāla*).

Supplement

No. 155 PĒRŪR PLATES OF SIṀHAVARMAN, REGNAL YEAR 18

No. 156 CHALUVANAHAḶḶI PLATES OF SIṀHAVARMAN

No. 157 CHALUVANAHAḶḶI PLATES OF MĀDHAVAVARMAN, YEAR 1

No. 158 KIṚUMOṚEKŌḶI GRANT OF MUṢKARA

No. 159 KUKKANŪR PLATES OF MĀRASIMHA II, ŚAKA 890

Ny. 155

PĒRŪR PLATES OF SIṀHAVARMAN, REGNAL YEAR 18

Provenance : Perūr, Coimbatore Taluk, Coimbatore District, Tamilnadu.

References : Through Shri I. Mahadevan, I.A.S. (Retd.), Madras. Plates in the possession of Mr. Harry Miller, *Indian Express*, Madras.

Language : Sanskrit. In prose except the customary imprecatory verses.

Metres : Verses 1-3 : *Anuṣṭubh*.

Script : Southern variety of Late Brāhmī.

Date : Regnal year 18. In characters of the 5th century A.D.

TEXT[1]

First Plate

१. सिद्धम्[2][।*]स्वस्ति[।*]जितम्भगवता गतघनगगनाभेन पद्मनाभेन । श्रीम-
२. **ज्जाह्नवेयकुला**मलव्योमावभासनभास्करस्य स्वभु-
३. जजवजजयजनितसुजनजनपदस्य दारुणारिगण-
४. विदारणरणोपलब्धव्रणविभूषणस्य[3] **काण्वायन**सगोत्रस्य[4]

Second plate : First side

५. श्रीमत्**कोङ्गणिवर्म्म**धर्म्ममहाधिराजस्य पुत्रस्य पितुरन्वागतगु-
६. णस्य अपि च.स्वबाहुवीर्य्योत्पाटितावगृहीतारिश्रीयशस:
७. नानाशास्त्रार्त्थसद्भावाधिगमप्रणीतमतिविशेषस्य नीति-
८. शास्त्रस्य वक्तृप्रयोक्तृकुशलस्य विद्वत्कविकाञ्चननिकषो-

---

1. From the original plates and inked estampages.
2. Expressed by a spiral symbol.
3. The more usual text is विभूषणभूषितस्य.
4. At the left extreme corner of this plate is a sprial symbol.

Second plate : Second side

९. पलभूतस्य दत्तकसूत्रवृत्तिप्रणेतुः श्रीमन्**माधव**महाधिरा-
१०. जस्य सूनोः पितृपैतामहगुणयुक्तस्य अपि च स्वभु-
११. ज[बललीलापा]स्तारिसर्व्वसम्पदः सम्यक्प्रजापालन-
१२. मात्राधिगतराज्यप्रयोजनस्य सुविभक्तभक्तभृत्यजनस्य

Third plate : First side

१३. पूर्व्वराजचरितानुगामिनः व्याळानेकोपनिग्रहपण्डितस्य श्री
१४. **कृष्णवर्म्म**महाधिराजस्य प्रियतनयेन स्ववंशचरितानुक्रम-
१५. विक्रमक्रमेणोपार्ज्जितराजशब्देन अपि च समदद्विरदतु-
१६. रा(र)गारेहणातिशयोत्पन्नकर्म्मणा धनुरभियोग[जनित सम्पादित*]सम्पद्विशेषेण

Third plate : Second side

१७. तोमरादि प्रहरणग्रहणमोक्षाभिव्यञ्जितदिव्यप्रभवेन
१८. सरभससमरसवनदीक्षाक्षपितारिपक्षयशोविभवेन
१९. देवद्विजगुरुपूजाभिरतेन आज्ञया दिवस्पतिना प्रज्ञया
२०. बृहस्पतिना यथावत्रि(त्त्रि)वर्ग्ग मार्ग्गानुवर्त्तिना धर्म्मविजयिना

Fourth plate : First side

२१. श्री**सिंहवर्म्म**महाधिराजेन आत्मन⌣प्रवर्द्धमानविपुलैश्वर्य्य
२२. अष्टादशेसंवत्सरे पेरूराधिष्ठानस्य रक्त[त*]डाकस्योदकपरिस-
२३. र्प्पिणि भूमिभागे अमान्यस्योत्तरे पार्श्वे आलमन्दाल
२४. दिनानुष्ठित चतुष्कण्डुकवापमात्रक्षेत्रं तत्तडाकसेतुसमीपे
२५. कण्डुकवापपञ्चटिकासहितक्षत्रं अपि च रक्ततगाकस

Fourth plate : Second side

२६. रस्यपूर्व्वपार्श्वतोट्टक्षेत्र[1]ञ्च राजप्रियया सम्यग्दर्शनयुक्त-

---

[1] The letter त्र, originaly omitted, is engraved below the line.

२७. या नन्दव्वाख्यया पञ्चशतकार्षापणानिदत्वा काकरालाधिपत
२८. ये अभिहिते तस्यैव हस्तात्क्रीत्वा स्वकृतायमूलसंघानुष्ठि-
२९. ताय अर्हदायतनाय सर्व्वपरिहारसंयुक्तं स्वमहाराजमुखा-
३०. ज्ञाप्त्या देवभोगक्रमेणाद्भिर्द्दत्तं लोभात्प्रामादाद्वायोस्याभिह-

Fifth plate

३१. र्त्ता स पञ्चमहापातकयुक्तो भवति[।*]अपि च मनुगीता[:*] श्लोका[:।*]स्वदत्तां
३२. परदत्तां वा यो हरेत वसुन्धराम्[।*]षष्टिवर्षसहस्राणि घोरे तम-
३३. सि वर्त्तते ।।१*] बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः[।*]यस्य
३४. यस्य यदा भूमिस्तस्य तस्य तदा फलम्[।।*२] स्वन्दातुं सुमहच्छक्यं दुःख-
३५. मन्यार्त्थपालनम्[।*]दानं वा पालनं वेति दानाच्छ्रेयोनु पालनमिति[1]

SUMMARY

After the usual invocation to the god Padmanābha, the charter introduces, in more or less the same fashion, the Western Ganga Kings Koṅgaṇivarmma-Dharmma-mahādhirāja, his son Mādhava-mahādhirāja and the latter's son Kṛiṣṇavarmma-mahādhirāja.

Kṛiṣṇavarman's dear son was Siṁhavarma-mahādhirāja who had earned the title of 'king' by means of the display of his valour in the tradition of his family, who had performed great feats by mounting ferocious elephants and horses, who had amassed unique wealth through his expertise in handling the bow, who had supernatural stature as manifested by (his expertise in the) throwing, arresting and release of the javelin, who was renowned because of having reduced his enemies through instant battles, who was ever engaged in worshipping the gods, the twice-born and the elders, who was like Indra in his order (being obeyed) and like Bṛihaspati in intelligence, who followed the path of the three traditional virtues, and who had conquered by righteousness;

by him, in the eighteenth victorious year of his reign, was granted land of the extent of being sown with four *kaṇḍukas* of seeds in an area irrigated by the waters of the Rakta-taḍāga of the city of Pērūru, along with a field called Pāñcaṭikākṣētra;

---

[1] Read पालनम् [।।*3] इति.

by his favourite (couresan 7) Nandavvā, who had the right perception (into the Jaina Philosophy), was granted, free from all encumbrances, at the instance of her king and as per rules governing the *dēvabhōga* grants, a garden-land after purchasing it for five hundred *kārṣāpaṇas* from Kākarālādhipati, to the temple of the Arhat which she had herself built and which was affiliated to the Mūla-saṁgha.

This is followed by an imprecatory portion consisting of a sentence in prose and three customary verses attributed here to Manu.

No. 156

CHALUVANAHAḶḶI PLATES OF SIṀHAVARMAN

Provenance : Chaluvanahaḷḷi, Kolar Taluk, Kolar District, Karnataka.

References : Devara Konda Reddi, *Kannaḍa Sāhitya Parishat Patrike*, 66-67, 15-26 and plate opposite p. 16.

Language : Sanskrit. In prose except the customary imprecatory verses.

Metres : Verses 1-4 : *Anushṭubh.*

Script : Southern variety of Late Brāhmī.

Date : Undated. In characters of the 5th century A.D.

TEXT[1]

First plate

१. स्वस्ति [।*] जितम्भगवता गतघनगगनाभेन पद्मनाभेन [।*] **गंगवंशोद्योत**[2]-

२. करस्य स्वबाहुवीर्य्योपार्ज्जितविभवस्य अनेकसमरावमर्द्दविजयलब्ध-

३. यशः प्रकाशस्य श्री**कोङ्कणिवर्म्म** [धर्म्मम*]हाधिराजस्य प्रपौत्रेण शक्तित्रयसम्पन्नस्य नी-

४. तिशास्त्रस्य वक्तृप्रयोक्तुः[3] दत्तकसूत्रार्थव्याख्यायिनः श्री **महाधव**[4]महाराजस्य

Second plate : First side

५. पौत्रेणव्याळकुञ्जरारोहणकुशलस्य षञ्जिवश[5]त्युपायप्रयोग कुशलबुद्धेः **कृष्ण**-

६. **वर्म्म**महाधिराजस्य पुत्रेण सद्धर्म्मोद्धरणप्रलम्बपीवरवृर्त्त[6] बाहुयुगलेन

७. पयश्चन्द्रचन्दनमन्दरपृथिवीसागरभास्करतुल्यमाधुर्य्यं कान्तित्वशैत्यगौरव-

---

1. From the plate published in the journal cited above.
2. Read गंगवंशोद्द्योत.
3. Reddi : प्रयोक्तुम्. The reading usually met with is °प्रयोक्तृकुशलस्य.
4. Read माधव.
5. Reddi : षड्विंश°.
6. Read : वृत्त°.

८. क्षान्तिधैर्य्यप्रतापेन दक्षिण्याज्जंव[1] शौचशौर्य्य त्याग विक्रमोत्साह-

Second plate : Second side

९. माहात्म्येन अप्रतिमपराक्रमयशसा नीतिवीधि[2]नियतनैपुण्येन शुक्रबृहस्पति-
१०. भ्यामप्याशास्यमानमतिविस्तारेण अनेकशास्त्रोदधिपारग मनविपूतात्मना अने-
११. कगोहिरण्य भूम्यादिदानैः प्रवृद्धधर्म्मसञ्चयेन क्रमाधिगतराज्ये-
१२. न गङ्गानाम्महाधिराजेन श्री**सिह[3]वर्म्मणा कुवलालविषये[4]कुपलाला**[5]धिष्ठाने तटाक-
स्याधस्तात्

Third plate : First side

१३. काश्यपाय वाजसनेयिने **मातृशर्म्मणे** अस्मदायुर्ब्बल विजयैश्वर्य्याभिवृद्धये
१४. **कुत्तूरक्षेत्रे मडवाय्यकेतारश्च[6] दीर्ग्घकेदारश्च चक्रकेदारश्च स्तलकेदारश्च** तच्चतुष्के-
१५. दारन्निवर्त्त[न*] द्वयम् ब्रह्मदेयक्रमेण सर्व्वैः परिहारैः सम्प्रत्तमृ[।*] योस्यापहर्त्ता
स पाप[7]
१६. पञ्चमाहापातकसंयुक्तो भवति[।*]अपिचास्मिन्नधिकारे मनुः[8]गीताः श्लोका भवन्ति
[।*] बहुभि-
१७. र्व्वसुधा दत्ता बहुभिश्चानुपालिता[।*] यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्
[॥*१]

Third plate : Second side

१८. अद्भिर्द्दत्तन्त्रिभिर्भुक्त[म्] सद्भिश्चपरिपालितम्[।*] एतानि न निवर्त्तन्ते पुर्व्वराज-
कृतानि च[॥*२]

---

1. Reddi : दाक्षिण्यार्ज्जित°.
2. Read : विधि°.
3. Read : सिंह°.
4. The territorial name **कुवलालविषये**, originally omitted, was engraved subsequently below the line, indicating the omission with a *kākapāda* on the top of the letter *ku* of the following word **कुपलाल**.
5. Read : **कुवलाला°**.
6. Better read **केदारश्च**.
7. The word **पाप** is redundant.
8. Read **मनु°**.

१९. स्वदत्ताम्परदत्ताम्वा यो हरेतो (त) वसुन्धराम् [।*] गवां शतसाहास्रस्य[1] हन्तुः पिबति तष्कृतम्[2] [॥*३]

२०. भूमिदानात्परन्दानन्न भूतन्न भविष्यति [।*] तस्यैव हरणात्पापन्न भूतन्न भविष्यति [॥*४]

SUMMARY

After paying obeisance to the god Padmanābha in the usual fashion, the charter describes **Koṅkaṇivarmma**-Dharmma-mahādhirāja as the illuminator of the **Gaṅga** family, as one who had acquired splendour by dint of the prowess of his arms and as one whose respledant fame had been acquired through victories secured in many battles;

his son was **Mādhava**-mahārāja who was endowed with three royal prerequisites, who was an adept in expounding and applying the science of polity and was the expounder of *Dattaka-sūtra*;

his son was **Kṛiṣṇavarmma**-mahādhirāja who was an expert in riding vicious elephants and whose intellect was trained in the employment of the twentysix expedients;

his son was **Siṁhavarmman** whose long and muscular arms were engaged in supporting righteousness, whose sweetness, sheen, coolness, loftiness, forebearance, gravity and splendour were respectively equal to that of milk, the moon, sandal, the Mandara mountain, the earth, the ocean and the sun, whose greatness had resulted from his dexterity, rectitude, purity, valour, liberality, prowess and energy, who was unequalled in the strength and fame, whose adroitness was characterised by the laws of polity, whose extensive knowledge was coveted even by Śukra and Bṛihaspati, whose mind had become thoroughly cleaned by his having crossed the ocean of many had acquired increasing merit by the many grants cows, gold and land made by him, who had inherited the kingdom in rightful, succession and who was the *mahādhirāja* of the **Gaṅgas** ;

by this king was given, as per the rules governing the *brahmadēya* grants and free of all hindrances, so that his own longevity, strength victoriousness and wealth may increase, two *nivarttanas* of wet-land comprising fields known by the names of *Maḍavāy-kēdāra, Dīrggha-kēdāra, Cakra-kēdāra* and *Stala-kēdāra* all situated in **Kūttūra-kṣētra**, to the *brāhmana* **Māṭriśarmman** of the Kāśyapa-gōtra and Vājasanēyi-śākhā- The gift-land was located below the tank of the capital city of **Kuvalāla** in **Kuvalāla-viṣaya**.

---

[1] Read : °सहस्रस्य.

[2] Read : दुष्कृतम्.

The details of the grant are followed by an imprecatory portion consisting of a short sentence in prose and four *ślōkas*.

No. 157

CHALUVANAHAḶḶI PLATES OF MĀDHAVAVARMAN, YEAR 1

Provenance : Chaluvanahaḷḷi, Kolar Taluk, Kolar District, Karnataka.

References : H. S. Gopala Rao : *Kannaḍa Sāhitya Parishaṭ Patrika*, 68, 43 ff. and plate.

Language : Sanskrit. In prose except the customary imprecatory verses.

Metre : Verses 1-3 : *Añuṣṭubh.*

Script : Southern variety of late Brāhmī.

Date : Regnal year 1, Phālguna śu. 15, Uttarā *nakṣatra*. In characters of the 5th century A.D.

TEXT[1]

First plate

१. जि[2]तम्भगवतागतघनगगनाभेन पद्मनाभेन [।*] श्रीम**ज्जाह्नवेयकु-**
२. **ला**मलव्योम (मा) वभासनभास्करस्य काण्वायन सगोत्रस्य श्रीमत्**कोङ्गणि-**
३. स्वस्ति [।*] **वर्म्म**धर्म्ममहाधिराजस्यपुत्रस्यपितुरन्वागतगुणयुक्त-
४. स्य नानाशास्त्रार्त्थंसद्भावाधिगमप्रणीतमतिविशेषस्य सम्य-

Secona plate : *First side*

५. क्प्रजापालनमात्राधिगतराज्यप्रयोज [न*] स्य श्रीमन्**माधववर्म्म** [धर्म्ममहा] धिरा-
६. जस्य सूनोरनेकयुद्धलब्धयशःप्रकाशस्य वसुधातलैकवीरस्य श्री
७. **मद्धरिवर्म्म**महाधिराजस्यपुत्रस्यपितृपैतामहगुणगणा-
८. लंकृतस्य अभ्युच्छितशक्तिसिद्धिसम्पन्नस्य श्रीमतो **मि (वि) ष्णुगोप**म-

---

1. From the plate published in the journal cited above.
2. There is no differentiation between medial *i* and *ī* signs in most cases.

Second plate : Second side

९. हाधिराजस्य पुत्रेण देवद्विजगुरुवृद्धापचायिना स्वभुजबल पराक्रमक्रि (क्र)-

१०. यक्रीता (त) राज्येनअमृतविषसमप्रसादकोपेनभगवद्धरचर-

११. णारविन्दाराधनसम्पादितसर्व्वसम्पदा कलियुगदोषावसन्नस-

१२. द्धर्म्मोद्धरणकृतपरिकरेण प्रतापोपनतराजमण्डलेनशक्तित्रय-

Third plate : First side

१३. सम्पत्प्रवृद्धराजश्रिया अनेकयज्ञदक्षिणादानैकव्रततत्परेण चिरविच्छिन्न-

१४. ब्रह्मदेयप्रदानप्रथितकीर्तिना श्रीमन्**माधववर्म्म**महाधिराजेन आत्मनः प्रवर्द्ध-

१५. मानविपुलविजयैश्वर्य्ये **प्रथमसंवत्सरे फाल्गुने मासे तिथौ पौर्ण्णमास्यां**

१६. **उत्तरे नक्षत्रे** स्वविजयायुष्यैश्वर्य्याभिवृद्धये वत्सगोत्राय वाजसनेयिने **दिवा-**

Third plate : Second side

१७. **करस्वामिने कुवलालराष्ट्रे कुवलाल तटाक**स्याधस्ता[त्] **कुरट्टूरकेदारश्च चेम्ब-
केदारश्च चक्रकेदारश्च**

१८. एतानित्रयाणि केदाराणि ब्रह्मदेयक्रमेणसर्व्वपरिहारयुक्तः सम्प्रदत्तः[।*]यो[ऽ*]-

१९. स्य लोभात्प्रमादाद्वापिहर्त्ता स पञ्चमहापाता (त) कसंयुक्तो भवति[।*]अपि च मनुगी-

२०. ताश्लोकाभवन्ति ।।। स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धरां (राम्) [।*]गवां शतसह-
स्रस्य

Fourth plate

२१. हन्तुः पिबति दुष्कृतम् ।।[१*] भूमिदानात्परन्दानन्नभूतन्न भविष्यति[।*]

२२. तस्यैव हरणात्पापन्न भूतन्न भविष्यति ।।[२*]ब्रह्मस्वन्तु विषं घोरं

२३. न विषं विषमुच्यते[।*]विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकम् ।।।[३*]

२४. स्वस्त्यस्तु गोब्राह्मणेभ्यः ।।। शान्तिरस्तु ।।[1]

SUMMARY

After paying the customary obeisance to the god Padmanābha, the charter introduces, in more or less the usual fashion, *Dharmma-mahādhirāja* **Koṅgaṇivarmman**, his son **Mādhavavarmma**-Dharmma-mahādhirāja and the latter's son **Viṣṇugō**pa-mahādhirāja;

---

[1] The double *daṇḍa* is followed by a few more indifferently engraved punctuation marks.

Viṣṇugōpa's son was **Mādhavavarmma**-mahādhirāja who adored the gods, the twice-born and the elders, who had, as if, purchased his kingdom by the strength of his arms, whose favours and fury were respectively the same as nectar and poison, who had acquired all his wealth through the worship offered at the feet of the god Hara (śiva), who had upheld the true faith which had been eclipsed by the Kali age, who had cowed down the circle of (rival) kings by his valour, whose regal splendour had grown in richness because of the three *śaktis*, who was ever engaged in making gifts in many religious sacrifices and who had become famous by gifting *brahmadēyas* which had long ceased to exist;

by him, in his victorious **initial regnal year, on the full-moon day of the month of Phālguna**, when the **star** was **Uttarā,** was donated, for the augmentation of his victory, longevity and wealth, three pieces of wet-land, called *Kuraṭṭūra-kēdāra*; *Cemba-kēdāra* and *cakra-kēdāra* below the tank of **Kuvalāla** in **Kuvalāla-rāṣtra**, to the brāhmaṇa **Divākarasvāmin** of vatsa-sagōtra and Vājasanēyi-śākhā in accordance with rules governing *brahmadēya* grants and free of all encumbrances.

This is followed by an imprecatory portion consisting of a passage in prose and three customary verses. The text concludes with invoking welfare for the cows and the brāhmaṇas, and peace.

No. 158

KIṞUMOṞEKŌḶI GRANT OF MUṢKARA

Provenance : Not known.
References : Through G.A. Sivalingayya, Marimallappa Junior College, Mysore,
Language : Sanskrit. In prose except the customary imprecatory verses.
Metres : Verses 1-5 : *Anuṣṭubh*.
Script : Archaic Telgu-Kannaḍa.
Date : Vaiśākha. In characters of the 6th century A.D.

TEXT[1]

First plate

१. स्वस्ति [।*] जितम्भगवता गतघनगगनाभेन पद्मनाभेन [।*] श्रीमज्जाह्नवेयकुलामल-व्यो-
२. मावभासन भास्करस्य स्वखाङ्गैकप्रहारखण्डितमहाशिलास्तम्भ लब्धबलपरा-
३. क्रमयशसः दारुणारिगणविदारणरणोपलब्धव्रणविभूषण विभूषितस्य
४. **काण्वायन** सगोत्रस्य श्रीमत्**कोङ्गणिवर्म्म**धर्म्ममहाधिराजस्य पुत्रस्य पितुरन्वा-
५. गतगुणयुक्तस्य विद्याविनयव (वि) हितवृत्तस्य सम्यक्प्रजापालनमात्राधिगतराज्य-
६. प्रयोजनस्य नानाशास्त्रार्थसद्भावाधिगमप्रणीतमतिविशेषस्य विद्वत्कविकाञ्च-

Second plate

७. ननिकषोपलभूतस्य विशे [ष*] तोप्यनवशेषस्य नीतिशास्त्र [स्य*] वक्तृप्रयोक्तृकुशलस्य
८. सुविभक्तभक्तभृत्यजनस्य दत्तकसूत्रवृत्त (त्ते) ⌣ प्रणेतु [.*] श्री**माधव**महाधिराजस्य पु-
९. त्रस्य पितृपैतामहगुणयुक्तस्य अनेकचतुर्द्दन्तयुद्धावाप्त चतुरुदधिस-
१०. लिलास्वादितयशसः समदद्विरदतुरगारोहणातिशयोत्पन्न तेजसः धनुर-

---

[1] From the original plates and inked estampages.

११. भियोगसम्पादितसम्पद्विशेषस्य श्रीम**द्धरिवर्म्म**महाधिराजस्य पुत्रस्य गुरुगो-
१२. ब्राह्मणपूजकस्य नारायणचरणानुध्यातस्य श्रीम**द्विष्णुगोप** महाधिराजस्य पु-

Second plate : Second side

१३. त्रस्य त्र्यम्बकचरणाम्भोर्ह्[1]रजः पवित्रीकृतोत्तमांगस्य व्यायामोद्वृत्तपीनकठि-
१४. नभुजद्वयस्य स्वभुजबलपराक्रमक्रयक्रीतराज्यस्य क्षुत्क्षामोष्ठपिशिताशन-
१५. प्रीतिकरनिशितधारासेः कलियुगबलपंकावसन्न धर्म•वृषोद्धरणनित्यस-
१६. न्नद्धस्य श्रीमन्**माधव**महाधिराजस्य पुत्रस्याविच्छिन्नाश्वमेधा वभृथाभिषि-
१७. क्तश्रीमत्**कदंब**कुलगगनगभस्तिमालिनः श्री**कृष्णवर्म्म**महाराजस्य प्रियभागिने-
१८. यस्य जननीदेवतांकपर्य्यंक एवाधिगतराज्याभिषेकस्य विजृम्भमाणशक्तित्र-

Third plate : First side

१९. यस्य परस्परानवमर्द्दनोपभुज्यमानत्रिवर्ग्गसारस्य असंभ्रमावनमितसम-
२०. स्तसामन्तमण्डलस्य निरन्तरप्रेमबहुमानानुरक्तप्रकृतिवर्ग्गस्य विद्याविनयातिश-
२१. यपरिपूतान्तरात्मन[:*]कार्त्तयुगीनराजचरितावलम्बिन[:*]अनेकसमरविज-
२२. योपार्जितविपुलयशः क्षीरोदैकार्ण्णवीकृतभुवनत्रस्य निरवग्रहप्रदा-
२३. नशौर्य्यस्य अविषह्यपराक्रमाक्रान्तप्रतिराजमस्तकार्प्पिता प्रतिहतशासनस्य
२४. विद्वत्सुप्रथमगण्यस्यश्रीमत्**कोंगणि**महाधिराजस्य **अविनीत**नाम्नः पुत्रेण

Third plate : Second side

२५. **पुन्नाटराजस्कन्दवर्म्म** प्रियपुत्रिकाजन्मना स्वगुरु गुणानुगामिना पित्रापरसुतस-
२६. मावर्जितयापि लक्ष्म्या स्वयमाभिप्रत्यालिङ्गित विपुलवक्षस्थलस्य विजृम्भमाणशक्ति-
२७. त्रयोपनमितसमस्तसामन्तमण्ङलस्य **अन्दरिय अ(आ)लत्तूर पोरुळಱ[2]अ पेर्न्न-**
२८. **गरा**द्यनेकसमरमुखमखाहूतप्रहतशूरपुरुषपशूपहारविघसविहस्ती-
२९. कृतकृतान्ताग्निमुखस्य शब्दावतारकारस्य देवभारतीनिबद्ध वड्डुकथस्य **किरातार्जु-**
३०. **नीये** पञ्चदशसर्ग्गटीकाकारस्य **दुर्व्विनीत** नामधेयस्य समस्त **पाण्णाटपु-**

---

1. Read चरणाम्भोरुह.
2. This is Dravidian *ṟe*.

Fourth plate : First side

३१. **न्नाटा**धिपतिना वैवस्वतेनेव मनोर्व्वर्ण्णाश्रमाभिरक्षिण: दक्षिणान्दिशमभिगोप्तुं प-

३२. र्य्याप्तवत: प्रातिजनीनस्य सुप्रजसः पुत्रेण **उरगपुरा**धिप परमक्षत्रिय**चोळ-**

३३. **कुल**तिलक श्री **दग्धचरण**सन्तानप्रसूतवसुमतीन्द्रसुता सम्भवेनदुर्द्दान्तविमर्द्द-

३४. विमृदितविनमृ(म्र)विविधविश्वंभरेशमौलिमालामकरन्द पुञ्जपिञ्जरीश्रियमा-

३५. णचरणयुगळनळिनेन मकरकेतनायास्यमानवामलोचना विलोचनशरशरव्य-

३६. जातेन शरीरिणा धर्म्मेण श्री**पृथिवीकोंगणिराजेन** प्रतीत**मुष्कर**द्वितीयनामधेयेन

Fourth plate : Second side

३७. सर्व्वविद्यापारगेण विशेषतो नीतिशास्त्रनिपुणबुद्धिना किं बहुना सकल संपदा-

३८. धारभूतेन तैत्तिरियचरणाय प्रावचनकल्पाय **कुम्बशर्म्मणे** **कप्पुनि**दक्षिणत-

३९. टे **किऱु**[1]**मोऱे**[2]**कोऴि**[3] नाम ग्राम[:*]काश्यपगोत्राय उदकपूर्व्वं यथाविधि प्रादा-

४०. यि सकलमहामनुष्यप्रत्यक्षं ससर्व्वपरिहारं **वैशाखमासे** प्रशस्ततिथि-

४१. मुहूर्त्ते नक्षत्रे दिने [।*] अपि चात्र मनुगीता[:*]श्लोका[:।*] स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां(राम्) [।*]

४२. षष्ठि(ष्टि)वर्षसहस्राणि घोरे तमसि वर्त्तते ॥[१*]बहुभिर्व्वसुधादत्ता बहुभिश्चा-नुपालिता[।*]

Fifth plate

४३. यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥[२*]स्वन्दातुं सुमहच्छख्यं(क्यं)दुःख-मन्या-

४४. र्थंपालनं(नम्) [।*]दानं वा पालनं वेति दानाच्छ्रेयोनु पालनम् ॥[३*]अद्भिर्द्दत्तं-त्रिभिर्भुक्तं सद्भिश्च

४५. परिपालितं(तम्) [।*] एतानि न निवर्त्तन्ते पूर्व्वराज कृतानि च ॥[४*]ब्रह्मस्वन्तु विषं घोरं न त्रि-

४६. षं विषमुच्यते[।*]विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकं(कम्)॥[५*] **कूनाचार्य्या-न्वयेन**

---

1. This is Dravidian *ṟu.*
2. This is Dravidian *ṟe.*
3. This is Dravidian *ḻi*

४७. **कोङ्गणि पेर्न्दट्टारेणे**दन्ता(न्तां)ब्रशासनं लिखितं तस्मा[द्*]द्वादशखण्डुकावापमात्रं तत्र सु-

४८. क्षेत्रं ब्रह्मदेयक्रमेण दत्तं ।।।।

SUMMARY

After the usual invocation to the god Padmanābha, the charter gives the royal genealogy from **Koṅgaṇivarmma**-Dharmma-mahādhirāja to **Durvinīta** in more or less the same fashion as in other relevant W. Ganga charters (cf. No. 24 above).

Durvinīta's son was **Pṛithivī-Koṅganirāja** who had the second name of **Muṣkara** who was born to the daughter of the king who had been born in the lineage of **Dagdhacaraṇa** (i.e., **Karikāla**), the ornament of the Kṣatriya family of the **Cōḷas** who were the lords of **Uragapura**, whose two supple feet were adorned by the juice of the flowers of the garland adorning the heads of many different lords of the earth vanquished by him and whose body had become the object of the eyes of beautiful women, who had unlimited learning and was, in particular, a great expert in the science of polity, and who was indeed the very receptacle of all wealth;

by him was given, as per regulations and in the immediate presence of all the elders, free of all encumbrances, the village of **Kiṟumaṟekōḻi** on the southern bank of Kappuni (the river Kapini) to the brāhmaṇa **Kumbaśarman** of Taittirīya-caraṇa and Prāvacana-kalpa in the month of **Vaiśākha** on an auspicious day, moment and star.

This is followed by five of the customary imprecatory verses. The charter concludes with the statement that it was written (engraved ?) by **Koṅgaṇi-Perndaṭṭāra** of the lineage of **Kūnācārya** and that he was granted, as per *brahmadēya* rules, land of the extent of being sown with twelve *khaṇḍukas* of seeds.

No. 159

KUKNŪR PLATES OF MĀRASIṀHA II, ŚAKA 890

Provenance : Kuknūr, Yellurga Taluk, Raichur District, Karnataka.

References : *A.R. Ep.*, 1969-70, No. A 5.

Language : Sanskrit, prose and verse, and Kannaḍa.

Metres : Verses 1, 4, 8, 16-17, 19-20, 24-25, 35, 38, 40, 43 : *Sragdharā*; Verses 2, 5, 13, 23, 24, 42, 46-47, 50, 53-54, 66; *Vasantatilakā*; Verses 3, 9, 11, 14-15, 18, 22, 26, 33, 36-37, 39, 41, 45, 48, 51-52 : *Śārdūlavikrīḍitam*; verses 6, 32, 61-64 : *Anuśṭubh*; verses 7, 31, 57-60 : *Mālinī*; verse 10 : *Utpalamālikā* or *Kāmalatā*; verse 12 : *Śikhariṇī*; verses 21, 44 : *Indravajrā*; verses 27-28 : Arya; verses 29-30, 55-56 : *Praharṣiṇī*; verse 49 : *Mandākrāntā*; verse 65 : *Śālinī*.

Script : Kannaḍa.

Date : Śaka 890, Vibhava, Uttarāyaṇa-saṅkrānti (=968-69 A.D.).

TEXT[1]

First plate[2]

१. स्वस्ति[।*]जितंभगवता गतघनगगनाभेन पद्मनाभेन[।*]श्रीम**ज्जाह्नवेयकुळा**मळव्योमा-

२. वभासनभास्करः स्वखळ्गैकप्रहारखण्डितमहाशिळास्तंभ लब्धबलपराक्रमो दारुणारिगण-

३. विदारणोपलब्धव्र(व्र)विभूषणविभूषितः क(का)ण्वायन सगोत्रःश्रीमान् **कोङ्गुणिवर्म्म** ध-

४. र्म्ममहाराजाधिराज परमेश्वर श्री**माधव** प्रथम नामधेयः ।। तत्पुत्रः ।[3] पितुरन्वागत-

---

1. From inked estampages.
2. There is a vertical string of nine floral designs engraved along the left margin, before the commencement of the lines.
3. This *daṇḍa* is redundant.

५. गुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापाळन मात्राधिगतराज्यप्रयोज-

६. नो विद्वत्कविकाञ्चननिकषोपळभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसू-

७. त्रवृत्ते⌢प्रणेता श्रीमान्**माधव**महाराजाधिराजः ।। तत्पुत्रः पितृपैतामहा (ह) गुणयु-

८. क्तो [ऽ*] नेकचातुर्द्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादित यशाः श्रीम**द्धरि**[1]**वर्म्म**म-

९. हाधिराजः ।। तत्पुत्रो द्विजं (ज) गुरुदेवतापूजनपरो नारायणचरणानु-

१०. ध्यातः श्रीमा**न्विष्णुगोप**महाराजाधिराजः । तत्पुत्र स्त्र्यंबकचरणांभोरु-

११. हरज⌢पवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रय क्रीतराज्यः

१२. कलियुगबळपङ्कावसन्नधर्म्मवृषोद्धरणनित्यसन्नद्धः श्रीमान्**माधव**महाधि-

१३. राजः ।। तत्पुत्रः **श्रीमत्कदम्बकुळ**गगनगभस्तिमालिनः **कृष्णवर्म्म**महाधिराज-

१४. स्य प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रहप्रधानशौर्य्यो

१५. विद्वत्सुप्रथमगण्यः श्रीमान्**कोङ्गुणिवर्म्म**धर्म्म महाराजाधिराज परमेश्वर श्रीम**दविनी**-

१६. **त** पथमनामधेयः ।। तत्पुत्रो विजृंभमाणशक्तित्रयः **अन्दरि आलत्तूर्प्पोरुळ**ಱೆ[2]**पेर्न्नगरा**-

१७. द्यनेकसमरमुखमखहुतप्रहतशूरपुरुषपशूपहारविघस विहस्तीकृतकृ-

१८. तान्ताग्निमुखः **किरातार्ज्जुनीय**पञ्चदशसर्गटीकाकार श्री**दुर्व्विनीत**प्रथमनामधेयः ।।

१९. तत्पुत्रः दुर्द्दान्तिविमर्द्द विमृदितविश्वम्भराधिपमौलिमाला मकरन्दपुंजपिंजरीक्रियमा-

२०. णचरणयुगळनलिन श्री**मुष्कर**प्रथमनामधेयः ।। तत्पुत्र श्चतुर्द्दशविद्यास्थानाधिगत-

Second plate : First side

२१. विमळमतिः विसे (शे) षतो [ऽ*] नवशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुति-
मिरनिकरनिराकरणो-

२२. दयभास्करः श्री [**विक्र**] **म**प्रथितनामधेयः ।। तस्य **पुत्रः** अनेकसमर संपादितविजृंभित-
द्विरदनखकु-

२३. लिशाभिघातव्र (व्र) णसंरूढभास्वद्विजयलक्षणलक्षीकृतविशाळ वक्षस्थलः समाधिगत-
सकळशास्त्रार्त्थसमा-

२४. राधितत्रिवर्ग्गो निरवद्यचरितः प्रतिदिनमभिवर्द्धमान प्रभाव [:*] श्री **भूविक्रम**प्रथम-
नामधेयः ।। अपि च [।*]

---

1. The numerical figure 1 in Kannaḍa is engraved after this letter and to the left of the ring-hole, to indicate the number of the plate.
2. This is Dravidian *ṟe*.

२५. वृत्तं ।। नानाहेतिप्रहारप्रविघटितभटोर×कवाटोत्थितासृग्धारास्वादप्रमत्तद्विपशतचरण क्षोदसम्मर्द्द भीमे[।*]

२६. संग्रामे **पल्लवेन्द्र**न्नरपतिमजयद्यो **विलन्दा**भिधाने राजा **श्रीवल्लभा**ख्यस्समरशतजयावाप्तलक्ष्मीविळा-

२७. सः ।।[१*]तस्यानुजो नतनरेन्द्रकिरीटकोटिरत्नार्क्कदीधिति विराजित पादपद्मः[।*] लक्ष्म्या स्वयंवृतपतिर्**न्नवका**-

२८. **म**नामा शिष्टप्रियो[ऽ*]रिगणदारुणगीतकीर्त्तिः ।।[२*]अपि च ।। गद्यं ।। तस्य **कोङ्गुणि**महाराजाधिराजस्य **शिवमा**-

२९. **रा**परनामधेयस्य पौत्रः समवनतसमस्तसामन्तमकुटतट घटितबहळरत्नविळ-

३०. सदमर धनुः ।[1] खण्डमण्डितचरणनखमण्डलो नारायणचरण निहितभक्तिः शूरपुरुषतु-

३१. रगवरवारणघटासंघट्टदारुणसमरशिरसिनिहितात्मकोपो भीमकोपः ।[1] प्रकटरतिसम-

३२. य समनुवर्त्तनचतुरयुवतिजनालोकधूत्तो(र्त्तो) लोकधूर्त्तः ।[1] सुदुर्द्धरानेकयुद्धमूर्ध्निलब्ध-

३३. विजय सं[पद]हितगजघटाकेसरी राजकेसरी ।। अपि च ।। वृत्तं ।। यो **गंगान्वय**निर्म्मळां-

३४. बरतळव्याभासनप्रोल्लसन्मार्त्तण्डो[ऽ*] रिभयङ्करः शुभकरः सन्मार्ग्गरक्षाकरः [।*] सौराज्यं समुपे-

३५. त्य राजसमितौ राजन्गुणैरुत्तमै राजा **श्रीपुरुष**श्चिरं विजयते राजन्य चूडामणिः ।।[३*]

३६. कामोरामासुचापे दशरथतनयो विक्रमे नामदग्न्यः प्राज्यैश्वर्य्यैबळारिर्ब्बहुमहसि रविः स्वप्रभु-

३७. त्वे धनेशः[।*]भूयो विख्यातशक्तिः स्पु(स्फु)टतरमखिळ प्राणभाजां विधाता ।[1] धात्रा सृष्टः प्रजानां पतिरिति कवयो यं

३८. प्रशंसन्ति नित्यं(त्यम्)।।[४*]अपि च ।। गद्यं ।। स तु प्रतिदिनप्रवृत्तमहादान जनितपुण्याहघोषमुखरित मन्दिरोदार[:]

३९. **श्रीकोङ्गुणिवर्म्म**धर्म्ममहाराजाधिराजपरमेश्वर **श्रीपुरुष** प्रथमनामधेयः ।। तत्पुत्रः प्रतापवि-

४०. नमितसकळमहीपाळमौलिमाळालाळितचरणारविन्दयुगळो निजभुजविराजितनिशितखड्गपट्टा(ट्ट) समाक्र-

---

[1] This *daṇḍa* is redundant.

४१. ष्टनिकृष्टधरापाळवल्लभजयश्रीसमाळिंगितः ॥ अपि च ॥ वृत्तं ॥ यस्मिन्प्रयातवति कोपवशं मही-

४२. शे यान्तिक्षणादहित भूमि भुजो रणाग्रे । अन्त्रावळीवळय भीषणमन्तकस्य ।[1] वक्त्रान्तरं क्षतजकर्द्द-

Second plate : Second side

४३. मदुर्न्निरीक्षं (क्ष्यम्) ॥ [५*] अपि च ॥ गद्यं ॥ स तु विख्यात विमळगंगान्वयनभस्तळग भस्तिमाळी श्री**कोङ्गुणि वर्म्म**धर्म्ममहा-

४४. राजाधिराजपरमेश्वर श्री**शिवमारदेव**प्रथमनामधेयः ।[1] **सैगोट्ट**ापरनामा ॥ कनीया-न्विजयादित्यस्तस्या-

४५. सीत्सजयांगना [।*] संश्लिष्टवक्षाः संक्षिप्तकाळेयचरितो [ऽ*] भवत् ॥ [६*] अपि च ॥ वृत्तं ॥ भरत इव कळत्रं मेदिनीमग्र-

४६. जस्य ।[1] प्रयतमतिरगम्याम्मन्यते स्मावगर्ह्यां (र्ह्याम्) [।*] स तु सकळधरायान्धारिणी-नाथ सं (शं) सत् ।[1] प्रथितपृथु गुणो [ऽ*] पि

४७. प्रेमवान्सद्गुणौघैः ॥ [७*] अपि च ॥ गद्यं ॥ तत्पुत्रः शशधर करनिकरविशदविजय-यशोराशिविशदीकृत-

४८. विश्वविश्वंभराचक्रवाळः समधिगतसकलराज्यलक्ष्मी समाळिंगितोत्तुंगवक्षाः ॥ अपि च । [।*] वृत्तं ॥ दानेकानीनं (न)-

४९. मुर्व्वीभरभरणविधौ शेषमाजौ च पार्त्थं ।[1] गांभीर्य्ये वाहिनीशं कलियुगचरितोदन्वतः शोषणे च । दक्षं सद्बाड-

५०. बा (वा) ग्निं शरणमुपगतस्याबने वज्रबन्धप्राकारं प्राणभाजां स्थितिकरणविधौ यं वदन्ति प्रजेशं (शम्) ।- [८*] अपि च ॥ ग-

५१. द्यं ॥ स तु **सत्यवाक्यकोङ्गुणिवर्म्म** धर्म्ममहाराजाधिराज परमेश्वर श्री**राजमल्ल**-प्रथमनामधेयः । तत्

५२. पुत्रः निजभुजोद्दण्डमन्दराचळप्र [म*] थितविश्व विद्विगड्बळार्ण्णवोद्धृतराजलक्ष्मी-समाश्लिष्टसमभि-

५३. रूढम[2] (व) क्षाः । अपि च ॥ चापोन्मुक्तशरोत्कराग्रपृषिते चण्डासिविद्युत्ततौ कोपो-द्दामग-

---

1. This *daṇḍa* is redundant.

2. The numerical figure 2 in Kannaḍa is engraved after this letter, on the left side of the ring-hole, indicate the number of the plate.

५४. जेन्द्रनीळजळदे रक्तप्रवाहे[ऽ*]समे । भीमे युद्ध घनागमे हयमहावाते रिपूर्न्नूर्ज्जितान्राजा ऱा[1]**मडि**नाम्नि यस्समजयद्राजाग्रणील्लीलया ॥[९*] **पल्लवराष्ट्रकूटकुरुमागधमाळवचो**-

५६. **ळलाळसंवल्लचळुक्य**वंशजमहानृपतिप्रमुखैरधिष्ठितं (तम्) । **वल्लभ**सैन्यमुन्नतमतङ्गजवाजि-

५७. भयाकुळं जयात्तल्ललनाक्षिवारिनिवहेन समं समरे न्यपातयत् ॥[१०*]अपि च ॥ गद्यं ॥ स तु

५८. **नीतिमार्ग्गकोंगुणिवर्म्म**धर्म्ममहाराजाधिराजपरमेश्वर भगवदर्हद्भट्टारकचरणारविन्दयुगळमधुपायमान-

५९. मान सश्रीम**दे**ऱे[2]**गङ्गदेव**प्रथमनामधेयः । तत्पुत्रः समस्तसामन्त मौळिमाळामकरन्दरजःशबळितचर-

६०. णारविन्दयुगळः समधिगतसमस्तविद्याविद्योतितान्तरात्मा ॥ अपि च ॥ वृत्तं ॥ यः प्रोद्यत्कलिकालवृत्तिवि-

६१. मुखः कामं गुणानां गणैर्म्मन्धातृप्रमुखादिराजसमितौ संभूषितस्सर्व्वथा । कोपोत्खातकृपाणखण्डितरि-

६२. पुक्ष्मापः कुळोद्योतकृन्माराकारतया मनस्सुविचरन्कान्ता जनानां भुविः(वि)॥[११*] इमे **वङ्गाः** **पौण्ड्राः** **मगध** नरपाः **कोश**-

६३. ळनृपाः अमी **कालिङ्गान्ध्राद्रमिळ** नरनाथाः स सुहृदः[।*]विशीर्ण्णा[ः*]शस्त्रौघैन्नरपतिविमुक्तैरितिजनः(नाः)प्रशं-

६४. सां यस्याळं विदधुरनिशं **सामियरणे** ॥[१२*]अपि च ॥ गद्यं ॥ स तु **सत्यवाक्यकोङ्गुणिवर्म्म**धर्म्म महाराजाधिरा-

Third plate : First side

६५. जः(ज)राजपरमेश्वर श्री**राजमल्ल**प्रथमनामधेयः ॥ अपि च ॥ वृत्तं ॥ तस्यानुजो विजितदुर्ज्जयराजरा-

---

1. This is Dravidian ṟā.
2. This is Dravidian ṟe.

६६. जो लक्ष्मीपतिर्म्मुरमिव प्रथितं हरिर्व्वा । द्विष्टम्**महेन्द्र** मजयद् **बिरियूरुसू**ऱ[1]र्य्यंन्यत्र **सामियर**-

६७. णे[ऽ*]प्यथ **बूतुगेन्द्रः** ॥[१३*]कोपे यः प्रळयानळ स्सुरकुजस्त्यागे सतीष्वङ्गजो ।[2] विद्यांगे नळिनात्मजो गजनये

६८. साक्षात्करेण्वात्मजः[।*] **कोङ्ग**न्वारणबन्धवारण करान्जि(ञ्जि)त्वा रणे पञ्चवा-र्य्युक्तप्राक्तन योगतः करिशतान्ये

६९. को[ऽ*]ग्रहीद्दुर्ग्रहः ॥[*]तस्य सुदूरोत्सारितसकळकाळेय कळङ्कस्य नामश्रवणमात्रे-णैवोपश-

७०. मितगर्व्वंगळगृहीतभूभृन्मण्डळस्य समस्तशास्त्रात्थानुशासिसत्यपरचवनवृत्तस्य परम-जैनस्य **गु**-

७१. **णवुत्तरङ्ग**ापरनामधेयस्य स्वस्त्य**मोघवर्षदेव श्री पृथ्वी वल्लभ**सुतायां शुभलक्षण-निखिळावयवशोभि-

७२. तायां ॥ अपि च ॥ वृत्तं ॥ आशीर्व्वादपरंपरापरिणतौ कल्याण कुल्योदितौ श्रीह्री-कीर्त्तिविशिष्टशीलसमितौ

७३. नृत्यादि विद्याततौ[।*]शिक्षासिद्ध्युदयाचळोज्व(ज्ज्व)ळततौ **चन्द्रोब्बलब्बा** पृथु श्रीमत्यामेऱ[3]**गङ्ग**भूतळ-

७४. पतिर्ज्जातस्सुतो वाङ्निधिः ॥[१५*]अपि च ॥ गद्यं ॥ स तु प्रतिपत्कळाधर इव प्रतिदिनमस्खळ-

७५. दुदयप्रवर्द्धमानकळाभिरभिवर्द्धमानः स्वपितृव्येण **राजमल्ल** देवेन श्रीम**दे**ऱ[3]**य्यप्प**-

७६. पट्टबद्धः ॥ अपि च ॥ वृत्तं ॥ युद्धेनृत्यत्कबन्धत्रितयमनुगता शेषरक्ष⁐पिशाचे य-

७७. स्यायस्संप्रहारात्पतितगजततेर्द्धूतरक्तप्रसिक्ते [।*] ज्याभूमि(मौ)रक्तवृष्टेश्चिरमिव भव-

७८. त⁐पापनाशे स्म सद्यो व्यागर्ज्जद्धूतवर्ग्गोहरिकुळिशहताद्धू भृतो[ऽ*]नेकतो वा ॥ [१६*]तस्मिन्यु-

७९. द्धे**न्महेन्द्रं** बळमिव बलभिद्या(द्यो)जघानार्य्यवीर्य्यं(र्य्यो) **सू**ऱ[1]**रन्नाडुगार्णिणि** पृथुतर **मि**-

---

1. This is Dravidian *ṟū*.
2. This is *daṇḍa* is redundant.
3. This is Dravidian *ṟe*.

८०. **डिगेश्यादि** शैळेन्द्रदुग्गर्गान[1] न्न्यां (न्यां) **स्तिप्पे**ಱು[2]मभ्रंलिह् मतिशयमा (वा) **न्येंज**ಱಾ[3]-द्यानधृष्यान् विग्र (ग्रा) ह्या नग्रहीद्यो

८१. झटिति परिगळद्दुग्गंवद्गर्व्वंजाळं (लम्) ।। [१७*] अपि च ।। गद्यं ।। तेन शरत्समयसमुदितविशदतरशिशिर [कर*] किरण निकराय-

८२. मानपटुतरयश ͜ पयोनिधिमज्जनोन्मज्जनोन्मूळीकृतकळिमळिन गेयवाद्यनृत्यविद्योपविद्याभरतेन म-

८३. व (वै) य्याकरणप्र (प्रा) माणिकेन समस्ताभिरामिक [विजिगीषु*] गुण मणि [भूषण] भ्राजमान नीतिमार्ग्गेण समस्तसामन्त ललाटघट्टितपा-

८४. दारविन्दद्वयेन धात्री निरवग्रहेण पालिता ।। स तु **नीतिमार्ग्गं कोङ्गणिवम्म (र्म्म)** धर्म्म-महाराजाधिराजपरमेश्वर-

८५. श्रीम**दे**ಱೆ[4]**गङ्गदेव**प्रथमनामधेयः **कोमरवेडेङ्ग**ः ।। अपि च ।। वृत्तं ।। तस्य ब्रह्ममहीन्द्रवृन्दमकुटव्यास-

८६. क्तरक्तातुळच्छायाकुंकुममंजरीकृतपदद्वन्द्वस्य देव्यां प्रभुः [।*] **चाळुक्या**मळवंश भूनिजगलिक्ष्मागाळपुत्र्या-

Third plate : Second side

८७. म्म (म) भू**ज्जाकांबा**व्यपदेशभाजितनयः श्री**सत्यवाक्यो** नृपः ।। [१८*] राजन्तीं राजविद्यां द्विरदनतुरगारोहणं कन्दु-

८८. कस्य क्रीडान्निर्स्त्रिशधेनुं [धनुरसि] लतिकान्नाटकं शब्दविद्यां (द्याम्) [।*] वैद्यं काव्यं प्रमाणं सगणित भरतं सेतिहासं

८९. पुराणं नृत्यंगीतञ्च वाद्यं प्रथमवयसि यो [ऽ*] भ्यप्त (स्त) वानिद्ध बुद्धिः ।। [१९*] **अन्ध्रा** रुन्द्रं गिरीणां पृथुळजळनिधेर्म्म-

९०. ध्यमीशाः **रवशानां पाण्ड्याः** श्रृङ्गन्तरूणाम्म (म) सुरविवरकं संहतिर्स्स**हळानां** (नाम्) [।*] पाताळं **केरळेन्द्रा** यममुखकु-

९१. हरं **पल्लवान्सं** (स्सं) श्रयन्ते यस्मिन्संरंभभाजिक्षितिभुजि भुजनिर्भ्भा (र्भा) सि निर्स्त्रिशयष्टौ ।। [२०*] अपि च ।। गद्यं ।। स तु **सत्य-**

---

1. Read दुग्गर्गान् । अ°.
2. This is Dravidian *ṟu*.
3. This is Dravidian *ṟā*.
4. This is Dravidian *ṟe*.

९२. **वाक्यकोङ्गुणिवर्म्म**धर्म्ममहाराजाधिराजपरमेश्वर श्रीम**न्नरसिंह देव**प्रथमनामधेयः **बीरवेडेङ्ग**[:॥]

९३. अपि च ॥ वृत्तं ॥ तस्यानुजो यो[ऽ*]जनि **राजमल्लो** नाम्नादिना दुर्द्धरराजमल्लः पूर्व्वावनीपाळकनीतिमार्ग्गो नाम्नापरे-

९४. णापि च **नीतिमार्ग्गः** ॥[२१*]पादातंशरपंजरैरविरळैरश्वीयमुग्रासिना हत्वा हास्ति-कमेकमेकगन्धकरिणा मूर्त्यानो-

९५. ழ[1]**बाण्णिगं**(गम्) [।*]जित्वाविश्रुत**कोत्तमंगल**रणे बाणै स्त्रिभिर्म्मं(र्म्मुं)द्रितं कृत्वा बिभ्यतमत्युवाह कृपया

९६. श्री **राजमल्ला**धिपः ॥[२२*]अपि च ॥ गद्यं ॥ स तु **नीतिमार्ग्गं कोङ्गुणिवर्म्म**धर्म्म-महाराजाधिराजपरमेश्वर श्री

९७. **राजमल्ल**प्रथमनामधेयः कच्चेयगङ्गः ॥ अपि च ॥ वृत्तं ॥ तस्यानुजो निजभुजार्ज्जित-संपदर्त्थी

९८. भूवल्लभं[2] समुपगम्य **डहाळ**देशे[।*]श्री**बद्देग**न्तदनु तस्य सुतां सहैव वाक्कन्यया व्यवहदुक्तवि-

९९. धिस्त्रिपुर्य्यां(र्य्याम्)॥[२३*]लक्ष्मीमिन्द्रस्यहर्त्तुं गतवति वियद्**बद्देगांक**महीशे हृत्वा **लल्लेय**हस्तात्क-

१००. रितुरगसितच्छत्रसिंहासनानि[।*]प्रादात्**कृष्णाय** राज्ञेक्षितिपति गणनाश्व(स्व)ग्रणीर्य्यं-⌣प्रतापाद्रा-

१०१. जा श्री **भूतुगाख्य**स्समजनि विजितारातिचक्रः **प्रचण्डः** ॥ [२४*] किं चातः किन्नु नागाद**चळपुर**पतिः **कक्कराजो** [ऽ*]न्त-

१०२. कास्यं **बिज्जाख्यो दन्तिवर्म्मा**(**र्म्मा**) युधि निजवनवासिन्वमे वाज**वर्म्मा**(**र्म्मा**) [।*] शांतत्वं **शान्तळेशो** नुழ[3]**गुगिरि** पति**र्द्दामरे**(**रि**) दर्प्पं भं-

१०३. गं वार्द्धयन्त**नागवर्म्मा** भयमतिरभसा(या)**द्गङ्गगांगेय** भूपात् ॥[२५*] **राजा-वित्य** नरेश्वरं गजघटाटोपेन संद-

---

1. This is Dravidian *ḻāṁ*.
2. The numerical figure 3 in Kannaḍa is engraved after this letter and to the left of the ring-hole, to indicate the number of the plate.
3. This is Dravidiain *ḻu*.

१०४. र्प्पितं जित्वा देशतयेवगण्डुगमहो निर्द्धाटिच **तंजापुरीन्ना**[1] ழ[2]**टे** प्रमुखादिदुर्ग्गनिवहान्दग्धा (ग्ध्वा) गजेन्द्रान्हया-

१०५. न् **कृष्णाय** प्रथितं धनं स्वयमदात्[3] श्री**गङ्गनारायणः** ॥[२६*] अपि च ॥आर्य्या॥ एकान्तमतमदोद्धतकुवा-

१०६. दिकुंभीन्द्रकुंभ संभेदं (दम्) [।*] नैगमनयादिकुळिशैरकरो**ज्जयवुत्तरङ्ग**नृपः ॥[२७*] तस्य कविनिकषभूमे**र्ब्ब**-

१०७. **द्दगदेवस्य** गुणनिधे‿पुत्र्याः [।*] **रेवकनिम्मडि** नाम्न्याः **चागवेडें**गीति सै (सं) ज्ञायाः ॥[२८*] अपि च ॥गद्यं॥ स तु **स**-

१०८. **त्यवाक्य कोङ्गुणिवर्म्म**धर्म्ममहाराजाधिराजपरमेश्वर भगवदर्हद्भट्टारकचरणारविन्दयुगल-

Fourth plate : First side

१०९. मधुपायमानमानस श्री**भूतुग**प्रथमनामधेयः **नन्नियगङ्गः** ॥ अपि च ॥ वृत्तं ॥ तत्पुत्रो **मगधक**-

११०. **ळिङ्गपाण्ड्यचोळ**क्ष्मापाळैरभिनुतपादपङ्कजस्य [।*] **कृष्णस्य** प्रहतरिपुव्रजस्य पुत्री (त्रीं) लीळातो व्यवहदा (द) चिन्त्य **नीतिमा**-

१११. **र्ग्गः** ॥[२९*] स स्नेहान्सकळमहीश**कृष्ण**भूपाद्भूनाथः खळु मदनावतारस (सं) ज्ञं [।*] छत्रन्तन्नरपतिभिर्न्न कैश्चिदाप्तं सं-

११२. प्राप्तो **मरुल** इति प्रसिद्धनामा ॥[३०*] अपि च ॥गद्यं॥ स च जिनवरच्चरणांभोरुहमधुपायमानमानसो मानस

११३. सरोवर इव समाश्रितसकळ राजहंसोहंसधवळायमानदिगन्त विश्रान्तकीर्त्तिः कीर्त्तिमनोभवः ॥ अपि च ॥ वृ-

११४. त्तं ॥ बुधकमळहितत्वाद्गङ्गमार्त्तण्ड भूपः कविनुतचरित त्वान्मानवो **नीतिमार्ग्गः** [।*] बळिरिपुदह (ळ) नत्वा**द्गङ्गचक्रायु**-

११५. **धाङ्कः** कृपणजनहितत्वात्कामदः कामदानात् ॥[३१*] अपि च ॥ श्लोकं ॥ यस्य चाळोकन (नं) प्राप्तो मन्यते कामिनीजनः [।*] मम रा-

११६. मेति स (सं) ज्ञेयं संप्रासाद्य कृतार्त्थतां (ताम्) ॥[३२*] वृत्तं ॥ शौचं शौचमहाव्रतैः कविवरैः काव्यं कृतार्त्थार्त्थिभिस्त्यागः **के**-

---

1. Read पुरीम् । ना°.
2. This is Dravidian *ḻkō*.
3. Sandhi has not been observed here.

११७. **रळपाण्ड्यचोळ**निवहैः शौर्य्यान्नियोनीतिगैः [।*] धर्म्माधर्म्म परैर्ज्जनैस्सुभगता(तां) यस्यादराद्गी-

११८. यते सो[ऽ*]यं सत्यगुणांबुधिर्व्विजयते श्री**गङ्गचक्रायुधः** ।।[३३*] अपि च ।। गद्यं ।। स तु **नीतिमा-**

११९. **र्गकोङ्गुणिवर्म्म**धर्म्ममहाराजाधिराज परमेश्वर श्री**पुणुसेयगङ्ग** प्रथमनामधेयः **कलियुग-**

१२०. **भीमः** ।। अपि च ।। वृत्तं ।। आसीज्जगद्गहनरक्षणराजसिंहः क्ष्मामण्डळाब्जवनमण्डनराजहंसः [।*] श्री-

१२१. **मारसिंह** इति बृंहितबाहुकीर्त्तिस्तस्यानुजः कृतयुगः क्षितिपाळ कीर्त्तिः ।।[३४*] आदेशाद्देव**चोळान्त-**

१२२. **क**धरणिपते**र्गंगचूडामणि**स्त्वं वेगादभ्येति योद्धुं त्यज गजतुरगव्यूहसन्नाहदर्प्पं [।*] ग-

१२३. ङ्गामुत्तीर्य्यगंतुंप्लवबळमतुळं कळ्पयेत्याप्तदूतैर्व्विज्ञप्तं **गूर्ज्जराणां** पतिरकृत तथा यत्र

१२४. जैत्रप्रयाणे ।।[३५*] **लल्लः** प्रौढसितासिदण्डदशनक्षुण्णक्षमा भृत्कुळस्तावद्विन्ध्यगिरीन्द्रसन्धुरपतिः[1] स्वैरा-

१२५. दवैरस्थितः । याव**द्गुत्तियगङ्ग**सैन्यपटहप्रध्वानसिंहध्वनिन्नोद्यातीतिदिगन्तरेषुपतिकैर्य्य-

१२६. द्विक्रमः कथ्यते ।।[३६*]वंशश्रीगृहमण्डनं कुळधनं लक्ष्मी सखिस्सुन्दरीर्व्वीरश्रीकृतकाचळान्मदगजा**नल्ल-**

१२७. स्य हत्वारणे[।*]य**श्चोळान्तकवीर**विस्मयकरो जातस्तवेव स्तुवे देवं **गुत्तियगङ्ग**भूपमिति यं विश्वंभरा व-

१२८. न्दते ।।[३७*]विन्ध्येवन्धीकृतारिक्षितिपतिमहसिस्वर्गते **कृष्णराजे** दोष्णावष्टभ्यदुष्टावनिपकुळमिळा**मिन्द्रराजस्य**

१२९. कर्त्तुं(र्त्तुम्) [।*]त्राणश्वेतातपत्रः कुमुदरुचियशच्छत्रमुख्यामपूर्व्वां प्राप्तः श्री**गङ्गचूडामणि**रिति धरणि

Fourth plate : Second side

१३०. स्तौति यद्वीरकीर्त्तिः ।।[३८*] एकस्संप्रति **मारसिंह**नृपति र्व्विक्रान्तकण्ठीरवो यत्र त्रासितसाहसोन्मदमहासामन्त-

---

[1] Read सिन्धुरपतिः.

१३१. मत्तद्विपे [।*] **इन्द्र**स्याजनि पट्टबन्धमहिमा निर्व्विघ्नमित्युर्व्वरा चक्रं यस्य पराक्रमं पुळकितैर्व्व्यार्यावर्ण्णयन्य-

१३२. ङ्गकैः ॥[३९*] स श्रीकान्ताकटाक्षावळिललितरुचा माळया चामराणां लीळाव- द्वारनारीकरविचळितया सञ्च-

१३३. रेत्कुन्तळान्तः [।*] वीरोर्व्वीपाळसेवांजळिकमळपुटैरर्ग्घि तांघ्रिश्चिराय क्षमाकान्तां कीर्तिभूषारुचिरनुभवता**द्गङ्गक**-

१३४. **न्दर्प्प**भूपः ॥[४०*] पादांभोरुहभृङ्गभृत्यभरण व्यापारचिन्तामणिः संत्रासग्रहविह्वळी- कृतरिपुक्ष्मापाळरक्षामणिः [।*]

१३५. वाद्यत्कण्ठ विभूषणोकृतगुणप्रोद्भासिमुक्तामणिर्द्देव × कस्य न वर्ण्णनीयचरित श्री**गङ्गचूडामणिः** ॥[४१*] दिक्कन्यका-

१३६. विचकितोद्गमकर्ण्णपूराः दिग्वारणाः(णा) श्रवणपल्लवचामराश्च आभान्तिसंप्रति निरन्तरमुल्लसद्भिः श्री**मारसिंह**-

१३७. नरनाथ भवद्यशोभिः ॥[४२*] मन्दाकिन्या जिनेन्द्रस्नपनविधि पयस्सन्दसंपाटितायाः काळिन्द्याश्चण्डवैरिप्रहितग-

१३८. जमदश्चोतनिर्व्वर्त्तितायाः [।*] संभेदश्रीनिकेतांगणभुविभवतो **गङ्गकन्दर्प्प**भूप व्यातन्यो दि-

१३९. ग्वधूनां विधुविजयियशोहारमाचन्द्रतारं (रम्) ॥ [४३*] अपि च ॥ गद्यं ॥ स भुवनैकमङ्गळजिनेन्द्रनित्या-

१४०. भिषेक[1] मङ्गळकळशीकृतारातिक्षितीशकेशापहारागतराज्याभिषेक रत्नकळशः स तु **सत्य**-

१४१. **वाक्यकोङ्गणिवर्म्म**धर्म्ममहाराजाधिराजपरमेश्वर श्री**मारसिंहदेव** प्रथमनामधेयः **गङ्गक**[2]-

१४२. **कन्दर्प्प**ः ॥ अपि च ॥ **गङ्गान्ववा**योदयशैळभानोः श्रीपद्मिनीकामविकाश (स) हेतोः [१*] तस्याग्रजा **कुन्द**-

१४३. **णसामि**रासीत्कुन्दच्छदच्छायगुणी प्रसूतिः ॥[४४*] नेत्रानन्दकरो विधुर्द्धृतरिपुध्वा- न्तस्सहस्रद्युतिः स्वश्री (स्त्री) यो

---

[1] The numerical figure 4 in Kannaḍa in engraved after this letter and to the left of the ring-hole, to indicate the number of the plate.

[2] The letter क is redundant.

१४४. **जयबुत्तरङ्ग**नृपतेस्सोन्वर्त्थनामोन्नतः [।*] **राजादित्य**महीपति⌒पतिरभूद्यस्या **श्चळुक्यान्वय-**

१४५. क्षीरांभोनिधिसंभवक्षितिभुजामुत्तंसभूषामणिः ।। [४५*] यस्याविपक्षवनितावदनारविन्दचन्द्रद्यु-

१४६. तेश्चरितजन्म भुवो बभूव । मूतिर्म्मनोजनवचंपकचापयष्टिः कीर्तिश्च दिग्युवतिनूतनहार-

१४७. यष्टिः ।।[४६*] चूतांकुरप्रसवपल्लवमल्लिकाभिर्द्देवस्य पुष्पधनुष⌒प्रविधायपूजां (जाम्) [।*] सौभाग्यमु[1]

१४८. मुत्पळ विळासविळोचनाभिरभ्यर्त्थ्यंते स्म कुसुमर्त्तु दिनेषु यस्याः ।। [४७*] शुद्धान्तप्रमदासु यौवन-

Fifth plate : First side

१४९. मदादुद्दामलीळास्वपि प्रत्युक्तप्रतिकामिनीजनधियो यस्यास्सपत्नीमतिः [।*] आसीदाहवदो-

१५०. हृदक्षितिपते⌒प्राणप्रियायाः परं वीरश्रीयुवतौ मनोज विजय श्रीनित्यचैत्रश्रियः । [।*४८] नित्यं

१५१. यस्यां समजनि जिनस्नानवार्द्धौतदूते चूडाधारे जिनपदनख ज्योतिषां चक्रवाळं (ळम्) [।*] सान्द्रोन्मीळद्विचकि-

१५२. ळमयादाम यस्याश्चलीळारत्नादर्शो जिनमुखमभूद्भक्ति भूषान्दधत्याः ।। [४९*] अपि च ।।गद्यं।। श्रीमदमरनर-

१५३. वरनिकरमौळिमाळारज ⌒ पुंजपिंजरीभूतजिनेन्द्रचन्द्रपादारबिन्द द्वन्द्वषट्पदायमाना मानाग्रोदग्रधन-

१५४. दानानन्दीकृतानेकाश्रित विबुधजनहृत्पद्मा पद्माधिपपरम जिनेन्द्रप्रणीततत्वा (त्त्वा) मळजळप्रक्षाळितनिखि-

१५५. ळमनोमळा । मळास्पदानेककुमतिजनकथितदुस्तत्व (त्त्व) जळप्रपातसुदूरीभूतचित्तहरिणी । हरिणीक्ष-

१५६. णधवळकमळदळविळासाकर्ण्णायत रुचिरलोचनद्वय मधुकरविराजमानमुखांबुजा । अंबु-

---

[1] The letter मु is redundant.

१५७. जारिकरनिकरबिमळविपुळजिनशासन भवनमूलस्तंभायमान गङ्गकुळनभस्थ (स्त) ळाळंकार

१५८. त पूर्ण्णचन्द्रद्युतिः । चन्द्रद्युतिगिरीन्द्रामरेन्द्रकरीन्द्रकुन्दारबिन्द कुमुदसमुदितिविश-

१५९. दशारदाभ्रविभ्रमचारुकीर्त्तिः । कीर्त्तिध्वजाभिव्याप्तविपुळोदधि समुद्भावितावधिसमधि-

१६०. कभुवनान्तराळा । भुवनान्तराळसकळबाळाबळापर्य्यन्तानेक जनानवरतसमानाका-

१६१. रसंस्तूयमानानूनचारुचरिता । चारुचरिताधरीकृताखिळ भुवनतळप्रथित समुप-

१६२. गतविशुद्धेद्धनीतिभूषाविशेषोपभूषिताशेषदोषगहन दहनायमानानूनमानवज्जनलक्ष्यभूत-

१६३. प्रजातपुरातनप्रतिव्रता । प्रतिव्रतात्वाधिकविशदानेकाचिन्त्य संपद्स (त्स) मेतसव्द्रतशीळसंकुळाळंकृ-

१६४. तनिखिळविमळलक्षणोपलक्षितसकळजनाक्षिपक्षपातजनन समर्त्थकोमळांगयाष्टिः । कोमळां-

१६५. गयष्टिविशिष्टजनप्रशस्यमानाधिकसौन्दर्य्यसंपद्प्र (त्प्र) बल विमळधिषणाविशेषासमानीकृतमदनमानसो-

१६६. न्मादनवररूपविराजितानेककळास्पदरतिसरस्वतीदेवताति दुष्प्रापसकळकळाक-

